**Roll No. ...................................**

# E–3409

## B. A. (Classics) (Part III) EXAMINATION, 2021

SAHITYAM

**(Optional)**

Paper Second

*Time : Three Hours* ] [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. कस्यचिदेकस्य पद्यस्य व्याख्या विधेया— 10

(i) रजोजुषे जन्मनि सत्ववृत्तये
स्थितौ प्रजानां प्रलयः तमःस्पृशे।
अजाप सर्गस्थिति नाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः॥

(ii) अकारणाविष्कृतवैरदारुणाद्
असज्जनात् कस्य भयं न जायते।
विषं महाहेरिव यस्य दुर्वचः
सुदुःसहं सन्निहितं सदामुखे॥

(iii) जगुगृहंऽभ्यस्तसमस्तवाङ्मयैः

ससारिकैः पञ्जरवर्तिभिः शुकैः।

निगृह्यमाणा वटवः पदे पदे

यजूंसि सामानि च यस्य शङ्किता॥

2. कस्यचिदेकस्य गद्यखण्डस्य सप्रसङ्ग व्याख्या उपस्थापनीया— 20

(i) यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः, शास्त्रेषु चिन्ताः, स्वप्नेषु विप्रलम्भाः, छत्रेषु कनकदण्डाः, ध्वजेषु प्रकम्पाः, गीतेषु रागविलसितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाः, गवाक्षेषु जालमार्गाः, शशिकृपाणकवचेषु कलङ्काः, रतिकलेषु दूतप्रेषणानि, सार्यक्षेषु शून्यग्रहाः, न प्रजानामासन्।

(ii) अब्रवीच्च—देव ! विदितसकलशास्त्रार्थः राजनीतिप्रयोगकुशलः पुराणेतिहासकथालापनिपुणः, वेदिता गीतश्रुतीनां, काव्यनाटकाख्यायिकाख्यानक प्रभृतीनाम् अपरिमितानां सुभाषितानाम् अध्येता स्वयं च कर्ता, परिहासालाप पेशलः, वीणावेणुमुरजादीनाम् असमः श्रोता, नृत्यप्रयोगदर्शननिपुणः, चित्रकर्मणि प्रवीणः द्यूतव्यापारे प्रगल्भः, प्रणयकलह कुपितकामिनी प्रसादनोपायचतुरः,

गजतुरग पुरुषस्त्रीलक्षणाभिज्ञः, सकल भूतलरत्नोऽयं वैशम्पायनो नाम शुकः, सर्वरत्नानामुदभिरिव देवोभाजन मिति कृत्वा एनम् आदाय, अस्मत्स्वामिदुहिता देवपादमूलम् आयाता।

(iii) अवलोक्य च अहम् अचिन्तयम्—अहो ! प्रभावस्तपसाम्, इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्तीः सौदामिनीवचक्षुषः प्रतिहन्ति तेजांसि, सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य। शुष्कनलकाशकुसुमनिपतितानल चटुलवृत्ति नित्यम् असहिष्णु तपस्विनाम् तनुतपसामपि तेजः प्रकृत्या भवति।

3. 'कादम्बरीकथानुसारेण राज्ञः शूद्रकस्य वर्णनं कुर्यात्। 10

अथवा

कादम्बर्यनुसारेण उत्तमकथायाः गुणान् लिखत।

अथवा

महाकवि बाणभट्टस्य व्यक्तित्वं कृतित्वं निरूपयत।

4. कयोश्चिद् द्वयोः पद्ययोः सन्दर्भप्रसङ्ग सहितां व्याख्यां कुर्यात्— 20

(i) रसैः कथा यस्य सुधावधीरिणी
    नलः सभूजानिरभूद् गुणाद्भुतम्।
सुवर्णदण्डैक सितातपत्रित-
    ज्वलत्प्रतापा बलि कीर्तिमण्डलः॥

(ii) मदेकपुत्रा जननी जरा तुरा

नवप्रसूतिर्वरटा तपस्विनी

गतिस्तयोरेष जनस्तमर्दयन्

नहोविधे त्वां करुणारुणद्धिनः ॥

(iii) अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरूहीकृताम्।

करयन्त्रण दन्तुरान्तरे व्यलिखत् चञ्चुपुटेन पक्षती ॥

(iv) मृगया न विगीयते नृपैरपि धर्मागममर्म पारगैः।

स्मर सुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्यतः ॥

5. नैषधीयचरितस्य द्वितीय सर्गस्य कथासारं लिखत। 15

अथवा

नैषधीयचरितानुसारेण राज्ञः नलस्य चरित्रं चित्रयत।

अथवा

श्रीहर्षस्य कृतित्त्वं व्यक्तित्वं च निरूपयत।